# ॥ भाषागीतानि ॥

॥ १ ॥

## ॥ प्रवहतात् संस्कृतमन्दाकिनी ॥

शतशतकोटिशरत्पर्यन्तं प्रवहतात् संस्कृतमन्दाकिनी ॥

सिन्धु-शतद्रुसरस्वतीनां तटे ऋषीणां ध्यानपराणाम् ।
होमधूम-पावित-लोकानाम् अत्रिभृगूणां छन्दोवाणी ॥१॥

वाल्मीकिमुनि-व्यासविरचिता रामकृष्णयोः पावनगाथा ।
अखण्डदीपो भगवद्गीता कर्मयोग-सन्देश-दायिनी ॥२॥

इयमस्माकं धर्मभारती राष्ट्रैक्यस्य च महती स्फूर्तिः ।
विना संस्कृतं नैव संस्कृतिः इह परत्र कल्याणकारिणी ॥३॥

॥ २ ॥

## ॥ नैव क्लिष्टा न च कठिना ॥

सुरस-सुबोधा विश्वमनोज्ञा ललिता हृद्या रमणीया ।
अमृतवाणी संस्कृत-भाषा नैव क्लिष्टा न च कठिना ॥१॥

कविकोकिल-वाल्मीकि-विरचिता रामायण-रमणीय-कथा ।
अतीव सरला मधुर-मञ्जुला  नैव क्लिष्टा न च कठिना ॥२॥

व्यास-विरचिता गणेश-लिखिता महाभारते पुण्यकथा ।
कौरव-पाण्डव-सङ्गर-मथिता नैव क्लिष्टा न च कठिना ॥३॥

कुरुक्षेत्र-समराङ्गण-गीता विश्ववन्दिता भगवद्गीता ।
अमृत-मधुरा कर्मदीपिका नैव क्लिष्टा न च कठिना ॥४॥

कविकुलगुरु-नवरसोन्मेषजा ऋतु-रघु-कुमार-कविता ।
विक्रम-शाकुन्तल-मालविका नैव क्लिष्टा न च कठिना ॥५॥

॥ ३ ॥

## ॥ गेय संस्कृतम् ॥

संस्कृतभाषा सरला मधुरा सकलजनहिता सादरणीया ॥

उचितवासरे सुव्यवहारे सद्व्यवहारे साधुविचारे ।
सरस विनोदे सुजनामोदे सर्वानन्दे श्रेयः सुपदे ॥१॥

जात्युद्धरणे नीत्याख्याने सत्यभाषणे मत्युत्थाने ।
नवपदरचने नव्यतापने नानाचरणे न्यायवर्तने ॥२॥

भेदापगमे द्वेषोपशमे दोषापनये साम्योपनये ।
धर्मरक्षणे ज्ञानवर्धने विश्वशान्तये समैक्य कार्ये ॥३॥

॥ ४ ॥

## ॥ पठत संस्कृतम् ॥

पठत संस्कृतं वदत संस्कृतम् ।
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ॥

ज्ञानवैभवं वेदवाङ्मयं लसति यत्र भवभयापहारि मुनिभिरार्जितम् ।
कीर्तिरार्जिता यस्य प्रणयनात् व्यास-भास-कालिदास-बाण-मुख्य-कविभिः ॥१॥

स्थानमूर्जितं यस्य मन्वते वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम् ।
यद्विना जना नैव जानते भारतीय-संस्कृतिं सनातनाभिधां वराम् ॥२॥

जयतु संस्कृतं संस्कृतिस्तथा संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम् ।
जयतु संस्कृतं जयतु मनुकुलं जयतु जयतु संस्कृतं जयतु जयतु मनुकुलम् ॥३॥

॥ ५ ॥

## ॥ मुनिवर विकसित ॥

मुनिवर–विकसित–कविवर–विलसित–मञ्जुल–मञ्जूषा सुन्दर–सुरभाषा ।
अयि मातस्तव पोषण–क्षमता मम वचनातीता । सुन्दर–सुरभाषा ॥१॥

वेदव्यास–वाल्मीकि–मुनीनां कालिदास–बाणादि–कवीनाम् ।
पौराणिक–सामान्य–जनानां जीवनस्य आशा । सुन्दर–सुरभाषा ॥२॥

श्रुतिसुखनिनदे सकल–प्रमोदे स्मृति–हितवरदे सरस–विनोदे ।
गतिमतिप्रेरक–काव्यविशारदे तव संस्कृतिरेषा । सुन्दर–सुरभाषा ॥३॥

नवरस–रुचिरालङ्कृत–धारा वेदविषय–वेदान्त–विचारा ।
वैद्यव्योम–शास्त्रादि–विहारा शमयते पिपासाम् । सुन्दर–सुरभाषा ॥४॥

॥ ६ ॥

## ॥ जयतात् संस्कृतवाणी ॥

जयतात् संस्कृतवाणी मधुरा भवतात् विश्वजनादरणीया ।
मञ्जुलभाषिणी चारुविलासिनी कलरवरम्यधुनी ॥

पावन–मुनिजन–कुञ्ज–विहारिणी सुमनोमन्दिर–लास्य–विधायिनी ।
अनुपमसुन्दरी ललितकलावनी वल्मीकभवादि–कवीन्द्रखनी ।
ज्ञानप्रदायिनी रसिकविलासिनी घनविपदुपशमनी ॥१॥

सत्य–शान्ति–शम–दमोपदेशिनी धर्मकर्मसु धैर्यप्रचोदिनी ।
नीरसभुवने नवरसपूरिणी सपदि जनानां तापनिवारिणी ।
कलिमलहारिणी भवजलतारिणी सरसिजभवरमणी ॥२॥

॥ ७ ॥

## ॥ चिरनवीना संस्कृता एषा ॥

चिरनवीना संस्कृता एषा
गीर्वाणभाषा, चिरनवीना संस्कृता एषा ।

महतो भूतस्य निःश्वसितम्
अस्ति यस्याम्, अतिपुरातन–वेदसाहित्यं
शास्त्रपूरैः स्मृतिविचारैः
वरकवीनां काव्यसारैः
चित्रिता मञ्जुला मञ्जूषा, मञ्जुला भाषा ॥१॥

वाल्मीकि–व्यास–मुनिरचितं
रामायणं, महाकाव्यं महाभारतं
क्लैब्यकिल्बिष–कलित–पार्थं
कार्यविषये योजयन्ती
अस्ति यस्यां भगवती गीता, भगवता कथिता ॥२॥

मातृभाषा मातृभाषाणाम्
भवितुमर्हा, राष्ट्रभाषा भारतीयानां
भवतु भाषाद्वेषनाशः
सर्वथा उद्घोषयामः
भारतीया भारती एषा, अनुपमा सरसा ॥३॥

॥ ८ ॥

## ॥ संस्कृतेन सम्भाषणं कुरु ॥

संस्कृतेन सम्भाषणं कुरु, जीवनस्य परिवर्तनं कुरु ।
यत्र यत्र गच्छसि पश्य तत्र संस्कृतम्, संस्कृतेः संरक्षणं कुरु ॥

जीवनस्य लक्ष्यमस्ति किम्?
जीवनस्य लक्ष्यमेव संस्कृतस्य वर्धनम् ।
स्फूर्तिरस्ति तत्र प्रीतिरस्ति
स्फूर्तिरस्ति प्रीतिरस्ति संस्कृतस्य वर्धने
जिजीविषाम संस्कृताय रक्षयाम संस्कृतिम्
समर्पयाम संस्कृताय जीवनम् ॥१॥

जागृयाम वयं प्रेरयाम
जागृयाम प्रेरयाम सर्वहिन्दुसोदरान् ।
सम्पिबाम वयं पाययाम
सम्पिबाम पाययाम संस्कृतामृतं सदा
देशहितचिन्तनं विना यस्य जीवनम्
व्यर्थमेव तस्य गर्ह्यजीवनम् ॥२॥

ऐक्यमस्तु अचलबुद्धिरस्तु
ऐक्यमस्तु अचलतास्तु संस्कृताभिमानिनाम् ।
धीरतास्तु नैव भीतिरस्तु
धीरतास्त्वभीतिरस्तु मास्तु उदासीनता
मातृभूमिसेवनं दीनदलितरक्षणम्
संस्कृतप्रचार एव जीवनम् ॥३॥

॥ ९ ॥

## ॥ जागृहि संस्कृत ॥

जागृहि संस्कृत जागृहि भारत जागृहि संस्कृत तूर्णम् ।
निखिल–भुवन–जन–मानस–गगनं कुरु महसा परिपूर्णम् ॥

हे भारति निजविश्वविमोहन–वीणानादतरङ्गम् ।
सारय मानव–दानव हृदये कुरु तत् सरस–सरङ्गम् ॥१॥

प्रतिवदनं विलसतु सुरभाषा ऋषि–मुनि–कविवरमान्या ।
जयतु परा माता भुवि जयतात् संस्कृतवाणी धन्या ॥२॥

॥ १० ॥

## ॥ श्रीरामो मन्नाथः ॥

श्रीरामो मन्नाथः वन्दे रामं राघवम् ।
रामेण पालितं विश्वं नमो रामाय ते ॥१॥

रामात् सर्वं प्राप्यते कथा रामस्य श्रूयताम् ।
रामे भक्तिः करणीया मामव हे राम ॥२॥

तमेवाहं पूजये मां सदा स रक्षति ।
हृदये स ध्यायते मया मह्यं स दत्ते वरान् ॥३॥

नापेक्षते मत् किमपि सः योगक्षेमं वहति मे ।
मयि तस्य प्रीतिः शाश्वती पश्यतु सौभाग्यम् ॥४॥

॥ ११ ॥

**॥ लकाराः ॥**

लकारान् दश जानीमः काल–भाव–सुबोधकान् ।
दिशन्ति तत्र कालं षट् चत्वारोऽन्ये तु भावनाम् ॥१॥

पठति बालकोऽथर्वम् अपठत् स यजुःश्रुतिम् ।
अपाठीत् साम–मन्त्रांश्च पपाठ ज्योतिषं तथा ॥२॥

निरुक्तं पठिता वै सः ऋग्वेदं च पठिष्यति ।
एष भवतु मेधावी शास्त्रं सुरक्षितं भवेत् ॥३॥

सर्वो वेदं मुदा पठ्यात् सर्वो भूयात् सुसंस्कृतः ।
अज्ञः सुष्ठ्वपठिष्यच्चेत् अभविष्यच्च पण्डितः ॥४॥

॥ १२ ॥

**॥ मातृगीता ॥**

यावदस्ति त्रयीलोके चतुर्मुख मुखोद्भवा
यावद्वा रामचरितं वाल्मीकि कवि चित्रितम् ।
क्षरन्त्यमृतधारा वा यावद्व्यासस्य सूक्तयः
वाग्देव्या वरपुत्रस्य कालिदासस्य वा गिरः ।
तावदेषा देवभाषा देवी स्थास्यति भूतले
वंशोऽस्ति यावदार्याणां तावदेषा ध्रुवं ध्रुवा ॥

# ॥ स्फूर्तिगीतानि ॥

॥ १ ॥

**॥ जय जय भारतदेश ॥**

जय जय भारतदेश जय त्वं ।
जय जय भारतदेश ॥

नत्वा रुद्रं कैलासेशं ताण्डवकर्तारं,
ध्यात्वा रामं धनुर्धारिणं रावणहन्तारम् ।
स्मृत्वा कृष्णं चक्रधारिणं, कंसच्छेतारं,
प्रणम्य सर्वान् पराक्रमध्वं, घोषयध्वं, घोषयध्वम् ॥१॥

जयतु हनूमान् लङ्कादग्धा द्रोणाचलधारी,
जयतु प्रतापो राणावीरो गिरिकन्दरवासी ।
जयतु शिवाजी झान्सीलक्ष्मीः, देवी रणचण्डी,
प्रणम्य सर्वान् पराक्रमध्वं, घोषयध्वं, घोषयध्वम् ॥२॥

गङ्गा–यमुना–ब्रह्मपुत्रनद–गण्डक–पावनवारि,
कृष्णा–गोदा–सिन्धु–नर्मदाः तां सरयूं कावेरी ।
सह्य–सप्तपुट–विन्ध्य–हिमाचलम्, उन्नतशृङ्गसुशोभं,
प्रणम्य सर्वान् पराक्रमध्वं, घोषयध्वं, घोषयध्वम् ॥३॥

॥ २ ॥

## ॥ विस्मृतभेदाः सन्तः ॥

विस्मृतभेदाः सन्तो निर्मलभावापन्नाः ।
एकीभावं हृदयारूढं सततं कुर्वन्तु, भो भोः, सततं कुर्वन्तु ॥

पूर्वज–मुनिजन–कविजन–वाञ्छा सर्वेशामैक्यं
सुखिनः सर्वे सन्त्विति गानं तेशां बहुहृद्यम् ।
भाशा–धन–मत–जाति–विभेदः हृदये मा भवतु
दुःखित–दीन–जनानुन्नेतुं हस्ताः प्रसरन्तु, भो भोः, हस्ताः प्रसरन्तु ॥१॥

गङ्गा–तुङ्गा–कावेरी–जलमस्माकं मत्वा
कृतसङ्कल्पाः कार्यं कर्तुम् आलस्यं हित्वा ।
सुवर्णपुष्पां पृथिवीमेतां क्रष्टुम् आयान्तु
प्रवहतु कामं स्वेदस्रोतः धैर्यं मा जहतु, भो भोः, धैर्यं मा जहतु ॥२॥

घर्षण–लुण्ठन–वञ्चन–हननं प्रलयं संयातु
स्नेहस्रोतः प्रवहतु भ्रातुर्भावो हृदि लसतु ।
अनिलः सलिलम् अनलः सर्वं सर्वेषामेकं
प्रवहति रक्तमभक्तं मातुः भेदो मा भवतु, भो भोः, भेदो मा भवतु ॥३॥

॥ ३ ॥

## ॥ मृदपि च चन्दनम् ॥

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम् ।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः ॥

हरिमन्दिरमिदमखिलशरीरं धनशक्ती जनसेवायै ।
यत्र च क्रीडायै वनराजः धेनुर्माता परमशिवा ।
नित्यं प्रातः शिवगुणगानं दीपनुतिः खलु शत्रुपरा ॥१॥

भाग्यविधायि निजार्जितकर्म यत्र श्रमः श्रियमर्जयति ।
त्यागधनानां तपोनिधीनां गाथां गायति कविवाणी ।
गङ्गाजलमिव नित्यनिर्मलं ज्ञानं शंसति यतिवाणी ॥२॥

यत्र हि नैव स्वदेहविमोहः युद्धरतानां वीराणाम् ।
यत्र हि कृषकः कार्यरतः सन् पश्यति जीवनसाफल्यम् ।
जीवनलक्ष्यं न हि धनपदवी यत्र च परशिवपदसेवा ॥३॥

॥ ४ ॥

## ॥ हिमगिरेः शृङ्गम् ॥

हिमगिरेः शृङ्गं, देवनदीं गङ्गाम् ।
मनसि निधाय हि अनुभवामः अनुपममुत्तुङ्गं भावम्, अनुपममुत्तुङ्गम् ॥

दिव्य–सनातन–संस्कृतिः यतो हि वेद–पुराणानि ।
हिन्दोरुन्नत्यवनत्योः सदृशानि गिरि–शिखराणि ।
भीरु–मनःस्वपि धीर–स्वभावं जनयेयुर्हिमभवनानि ॥१॥

तं सुरलोकमतिक्रम्य अवतीर्णा या भागीरथी ।
भारत–मातुः सङ्गेन पुण्या जाता भाग्यवती ।
हिन्दूदेशे प्रतिजन–मनसः पावनकारिणी पुण्यवती ॥२॥

पराजयोऽपि सोपानं धैर्यं विजयस्य निदानम् ।
गच्छतु दुःखित–बन्धुभ्यो वक्तुं धैर्य–समाधानम् ।
मातुः गौरव–परिरक्षायै निष्ठं तनु–हृद्धन–प्राणम् ॥३॥

॥ ५ ॥

## ॥ जन्मदिनगीतम् ॥

जन्मदिनमिदं हे/अहि प्रिय सखे/सखी, शं तनोतु ते सर्वदा मुदम् ॥१॥
प्रार्थयामहे भव शतायुषि, ईश्वरस्सदा त्वां च रक्षतु ॥२॥
पुण्यकर्मणा कीर्तिमर्जय, जीवनं तव भवतु सार्थकम् ॥३॥

॥ ६ ॥

## ॥ ईशेन दत्तं तदिदं समग्रम् ॥

हस्तौ च पादौ नयने प्रसन्ने कर्णौ सुतीक्ष्णौ वदनं च कान्तम् ।
नासा सुरम्या मननाय चित्तं ईशेन दत्तं तदिदं समग्रम् ॥१॥

क्रीडामि धावामि पठामि नित्यं पश्यामि जिघ्रामि शृणोमि शुद्धम् ।
रात्रौ लभे चाथ सुखेन निद्रां ईशेन दत्तं तदिदं समग्रम् ॥२॥

॥ ७ ॥

## ॥ ससर्ज क्षेमाय ॥

दिवाकरं चापि निशाकरं च तारागणं चापि विहायसं च ।
प्रभञ्जनं चापि धनञ्जयं च ससर्ज क्षेमाय नृणां विधाता ॥१॥

लतासु पुष्पाणि वनेषु वृक्षान् फलानि वृक्षेषु फलेषु सारम् ।
पुष्पेषु रूपं गन्धं च शोभनं ससर्ज क्षेमाय नृणां विधाता ॥२॥

धनानि धान्यानि पटानि गेहं पापानि दुःखानि सुखानि चापि ।
ज्ञानं च विद्यां च कलाश्च सर्वाः ससर्ज क्षेमाय नृणां विधाता ॥३॥

ग्रामा जनानां नगराणि पुंसां धेनुं हयं चात्र तथा गजं च ।
छागं च मेषं वृषभं तथैव ससर्ज क्षेमाय नृणां विधाता ॥४॥

वर्षा वसन्तं शरदं हिमान्तं शैत्यं निदाधं च दिनं च रात्रिम् ।
नक्षत्रचक्रं सुमनोहरं हि ससर्ज क्षेमाय नृणां विधाता ॥५॥

॥ ८ ॥

## ॥ भारतसावित्री ॥

महर्षिर्भगवान् व्यासः कृत्वेमां संहितां पुरा ।
श्लोकैश्चतुर्भिर्धर्मात्मा पुत्रमध्यापयच्छुकम् ॥१॥

मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥२॥

हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥३॥

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥४॥

न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ॥५॥

इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥६॥

॥ ९ ॥

## ॥ एकात्मता स्तोत्रम् ॥

यं वैदिका मन्त्रदृशः पुराणा इन्द्रं यमं मातरिश्वानमाहुः ।
वेदान्तिनोऽनिर्वचनीयमेकं यं ब्रह्मशब्देन विनिर्दिशन्ति ॥१॥

शैवायमीशं शिव इत्यवोचन् यं वैष्णवा विष्णुरिति स्तुवन्ति ।
बुद्धस्तथाऽर्हन्निति बौद्धजैनाः सत् श्री अकालेति च सिख्ख सन्तः ॥२॥

शास्तेति केचित् कतिचित् कुमारः स्वामीति मातेति पितेति भक्त्या ।
यं प्रार्थयन्ते जगदीशितारं स एक एव प्रभुरद्वितीयः ॥३॥